पं. द. 20

२९९

॥श्रीईशाभाष्यटिप्पणस्येदंपुस्तकं॥

॥१॥ ॥श्रीगणाधिपतये नमः॥ येनात्मना परेणेशा व्याप्तं विश्वमशेषतः॥ सोऽहं देहद्वयी
साक्षी विज्ञितो देहतद्गुणैः॥१॥ ईशावास्यमित्यादिमंत्रान् व्याचिख्यासुर्भगवान्
भाष्यकारस्तेषां कर्मशेषत्वशंकां तावद्व्युदस्यति॥ तथा हि। कर्मजडाः केचन मे
न्यंते स्मेशावास्यमित्यादयो मंत्राः [struck out] कर्मशेषाः मंत्रत्वादिषेत्वादिमं
त्रवदतः पृथक्प्रयोजनाभावाद्व्याख्येया इति तान्निरस्याह। ईशावास्यमि
त्यादय इति। इषे त्वेति शाखां छिनत्तीत्यादिवद्विनियोजकप्रमाणादर्शनात्स्व
करणांतरसाध्येत्यर्थः॥ श्रौतविनियोगाभावेऽपि बर्हिर्देवसदनं दामीत्यस्य
बर्हिर्लवनप्रकाशनसामर्थ्याद्बर्हिर्लवने यथा विनियोगः तथा कर्मांगात्म
प्रकाशनसामर्थ्यात्तत्र कर्मस्वेवास्तु विनियोग इत्यपि नाशंकनीयमित्याह॥
[struck out] तेषामिति। शुद्धादिविशेषणस्यात्मनः कर्मशेषत्वे प्रमा
णाभावात्तद्याथात्म्यं न केवलं कर्मानुपयोगि। किंतु कर्मणा विरुध्यत इत्या
ह॥ याथात्म्यं चेति। शुद्धोऽहं स्वभावतो नागंतुकेनापि पाप्मना विद्धः सर्वत्रै
कोऽशरीर आकाशोपम इति ज्ञानं न कटाक्षेणापि कर्म वीक्ष्यते। किं त्वापातत
प्रतिपत्तिरप्येतादृशी निरुणद्ध्येव कर्मप्रवृत्तिमित्यर्थः॥ किंच यः कर्मशेषः

उत्साद्यो दृष्टः यथा पुरोडाशादिर्विकार्यः सोमादिराप्यः मंत्रादिः संस्कार्यो व्री
ह्यादिस्तदुत्साद्यादिरूपत्वं व्यापकं व्यावर्त्तमानमात्मयाथात्म्यस्य कर्मत्वोपत्व
मपि व्यावर्त्तयति तथात्मयाथात्म्यं कर्तृभोक्तृ च न भवति । येन ममेदं समीहि
तसाधनं तातो मा प्राकर्त्तव्यमिति विधिकाराव्ययपुरःसरकर्त्तृत्वम् स्यात् इ
त्याह । नचैवमिति ॥ ननूपनिषदां जपोपयोगित्वादन्यस्य च प्रमाणा [illegible]
स्यादर्शनान्नास्त्ये वैतादृशमात्मयाथात्म्यं नेत्याह ॥ सर्वासामिति ॥ यत्परः श
ब्दः सशब्दार्थ इति मीमांसाप्रसिद्धेः सर्वासामुपनिषदां चैकात्म्यतात्पर्यदर्श
नेन जपोपयोगित्वमुपनिषदामस्य वक्तुं । तथा हि ॥ ईशावास्यमित्युपक्र
म्य सपर्यगाच्छुक्रमित्युपसंहारादनेकत्रादेकं तदंतरस्य सर्वस्येत्यभ्यास
दर्शनान्नैतद्देवा आप्नुवन्नित्यस्य पूर्वतासंकीर्त्तनात् को मोहः कः शोक एकत्व
मनुपश्यत इति फलवत्तासंकीर्त्तनात् कुर्वन्नेवेति जिजीविषेच्छतं समा इति
कर्मकरणानुवादेनासूर्यानाम इति निंदयैकात्म्यदर्शनस्य स्तुतत्वात्तस्मि
न्नापो मातरिश्वा दधातीति युक्त्यभिधानाच्चास्यास्तावदुपनिषद ऐकात्म्य
तात्पर्यं दृश्यते ॥ एवमन्यासामप्युपनिषदामुपक्रमोपसंहारैकरूप्याभ्यासा

पूर्वताफलवत्त्वार्थवादयुक्त्युपपादनानिषद्‌तात्पर्यलिंगानि हि कल्पे
न समुच्चये न चास्माभिस्तच्चालोके दर्शितानीति नेह प्र[illegible]तन्यंते। किं
च प्रत्ययसंवादेऽपि बलवत्त्वेकारणं प्रसिद्धं विघते चोपनिषदर्थे गीतादिसं
वादस्तस्मादुपनिषत्सदसमन्वयेनावगम्यमानमैकात्म्यं न प्रमाणान्तरोप
लंभविरोधेनापलापनीयं। यथेंद्रियांतरेणानुपलभ्यमानमपि रूपं च
क्षुषोपलभ्यमानं नापन्हूयते। तथैकात्म्यमपि नापन्हवार्हमित्याह।।गी
तानामिति। समं सर्वेषु भूतेष्वित्यादि गीतानामेकरूपतास्मेत्यादि
मोक्षशास्त्राणां चैकात्म्यपरत्वादित्यर्थः। यद्येतादृशं[illegible]मात्मतत्त्वं तर्हि
निरधिकारत्वात्कर्मकांडमुच्छिद्येतेत्यपि नाशंकनीयमित्याह।।तस्मा
दिति।।औपनिषदात्मयाथात्म्यविज्ञानवतः इष्यत एव कर्मकांडप्रामा
ण्यं। यथा न हिंस्यात्सर्वाभूतानीति निषेधशास्त्रार्थनिश्चयवत [illegible]
त एव श्येनादिविधिप्रामाण्यं। यथा च तीव्रक्रोधाक्रांतस्वांतं प्रति श्येनो
दिविधिप्रामाण्यं। तथा मिथ्यात्मदर्शिनं प्रति सैव कर्मविधिप्रामाण्यमि
त्यर्थः।। अत्र जैमिनिप्रभृतीनां संमतिमाह।। योहीत्यादिना।। अर्थित्यादि
युक्तस्य कर्मण्यधिकारः षष्ठेऽध्याये प्रतिष्ठापि

तस्तच्चार्थित्वादि मिथ्याज्ञाननिदानं न हि नभोवन्निष्क्रियस्य स्वत एव
दुःखासंसर्गिणः परमानंदस्वभावस्य सुखं मे स्यात् दुःखं मा भूदित्यं
र्थित्वं शरीरेंद्रियसामर्थ्येन च समर्थो हमित्यभिमानित्वं मिथ्याज्ञानं विना
संभवतीत्यर्थः। यस्मादात्मयाथात्म्यप्रकाशका मंत्राः न कर्मविधिशेष
भूता न च मानांतरविरुद्धार्थास्तस्मात्स्व[illegible]यो जनादिमत्त्वमपि तेषां सिद्ध
मित्याह॥ तस्मादेतद्विति॥ व्याख्येयत्वमुक्त्वा प्रतिपदं व्याख्येति। ईशेति॥
ईश ऐश्वर्ये। अस्य धातोः क्विपि लुप्ते कृदंतरूपं। ईट्। तस्य तृतीयैकवचनमी
शेति॥ ननु कर्तरि क्विप्विधानात्परमात्मनश्चाविक्रियत्वात्कथं क्विबंत
शब्दवाच्यतेति तत्राह॥ ईशेति॥ मायोपाधेरीशनकर्तृत्वसंभवात्[illegible]
त्क्विबंतशब्दवाच्यता न विरुध्यते निरुपाधिकस्य लक्ष्यत्वं संभविष्य
तीत्यर्थः। ईशित्रीशितव्यभावेन भेदस्तर्हि प्राप्त इत्याशंक्याह॥ सर्वं जंत्वना
मात्मा सन्निति॥ यथा दर्पणादिषु प्रतिबिंबानामात्मा सन् बिंबभूतो देवद
त्त ईशिता भवति। तथा कल्पितभेदेनेशित्रीशितव्यस्य संभवान्न वास्तव
भेदानुमानं संभवतीत्यर्थः॥ वस आच्छादने एतस्य रूपं वास्यं। तत्तु तः [illegible]

॥२॥

ईश्वरात्मकमेवेदं सर्वं भ्रांत्या यदनीश्वररूपेण गृहीतं तत्सर्वमीश्वर आत्मै
वेति ज्ञानेनाच्छादनीयं। सर्वात्मक ईश्वरोऽस्मीति ज्ञातव्यमेष तत्त्वोपदेशः छां
दोग्ये तत्त्वमसीति वदिष्यति॥ ब्रह्मैव सर्वमात्मैव सत्प्रकाशाविशेषतः।
हेयोपादेयभावोऽयं न सत्स्वप्नवदीयते॥ उक्तं च॥ न बंधोऽस्ति न मोक्षोऽस्ति
न विकल्पोऽस्ति तत्त्वतः॥ नित्यप्रकाश एवास्ति विश्वाकारो महेश्वर इति॥
यस्योपदेशिकज्ञानमात्रेणान्तर्दृष्टिर्न तिरस्क्रियते तस्य विचारादिप्र
यत्नेन तत्त्वप्रकाशोऽस्त्यन्तर्दृष्टिस्तिरस्क्रियत इत्यभिप्रेत्य दृष्टान्तमाह॥
यथेति॥ चंदनागरुदेवदारुदकादिसंबंधाद्दुर्भावादिना जातं यद्दौर्गं
ध्यं सोपाधिकं मिथ्या यथा तत्स्वरूपनिघर्षणाभिव्यक्तेन स्वाभावि
कगंधेनाच्छाद्यते तद्वद्विचारादेव वस्तुबलसद्भावान्मिथ्याबुद्धिबाधकत्वं
संभवतीत्याह॥ तद्वदेव हीति॥ स्वभावोऽनादिरविद्या तत्कार्यं स्वाभाविकं
स मित्यादि बाधयोग्यप्रदर्शनार्थं विशेषणं। एवं विचारादिप्रयत्नवतोऽन्तर्दृ
ष्टितिरस्कारसंभावनामुक्त्वा युक्तस्यानभिज्ञस्य सर्वमिदमहं चेश्वर एवेति।
भावनायामधिकृतस्य युक्तिकुशलस्य च विचारेऽधिकृतस्य सर्वकर्मसं

न्यास एवाधिकार इह मंत्रे विवक्षितस्तेन त्यक्तेनेति त्यागपरामर्शात् त्यजतेर्व
हिर्गतत्वेयं स्यान्तः प्रसक्तपरं पदमिसन्यत्राप्युक्तत्वात् पुत्राद्येषणायाश्चित्त
विक्षेपहेतुत्वेन प्रसिद्धत्वाच्चेत्यभिप्रेत्याह ॥ एवमीश्वरात्मेति ॥ विधित्सि
तं संन्यासं स्तौति ॥ तेन त्यक्तेनेति ॥ त्यागेनात्मा रक्षितः स्यान्निः क्रियात्मस्व
रूपावस्थानानुकूलत्वात् त्यागस्येत्यर्थः ॥ संन्यासिनः शरीरसंधारणो
पयुक्ते कौपीनाच्छादनभिक्षाशनादिव्यतिरिक्तेपि कस्यचिद्व्यपरिग्रहे
ष्व रागश्चेत् प्राप्नोति तन्निरोधे यत्नः कर्त्तव्यस्तस्य प्रधानविरोधित्वादित्य
भिप्रेत्य नियमविधिमाह ॥ एवं त्यक्तैषणा इति ॥ स्विदिति निपातस्येह सामा
न्यार्थत्वेपि कस्यस्विदिति वितर्कार्थत्वमन्यत्र प्रसिद्धं तदिह नाद्रियत इ
त्यनर्थक इत्युक्तं ॥ व्यवहारदृष्ट्याप्यालेन एवेदं सर्वं शेषात्तं जडस्य चि
त्परतंत्रत्वादतः प्राप्ते विषये नाकांक्षा कर्त्तव्या परस्वमोर्थतस्त्यागमेव सर्वे
मित्याकांक्षाविषय एव नास्तीत्यर्थः ॥ आद्यमंत्रस्य पूर्वार्द्धेन तत्त्वोपदेशः कृ
तः ॥ तृतीयपादेनापरिपक्वज्ञानस्य संन्यासविधिरुक्तश्चरमपादेन संन्या
सिनो नियमविधिरुक्त इति प्रतिपदं व्याख्याय संक्षिप्यार्थमनुवदत्युक्त

ईश

॥४॥ [illegible]रस्य संबंधाभिधित्सयैव मा सविदइत्यादिना॥ पूर्वमंत्रेण ज्ञानं विहितं यस्य
तस्यैवोत्तरमंत्रेण कर्म विहितं॥ ततः समुच्चयानुष्ठानेतात्पर्यं मंत्रद्वयस्य
त्येकदेशिनां कामुद्भावयति॥ कथं पुनरिति॥ शुद्धब्रह्मज्ञानस्य कर्मणा नैको
धिकारे विरुद्धत्वात् तुगमनत्रिदंडधर्मवदस्यैव मंत्रोपि क्रमेणैककर्तृकत्व
मितिचेन्न। विशिष्टरूपभेदात् भिन्नाधिकारत्वाद्यज्ञोक्तं ज्ञानकर्मणोर्वि
हितत्वेन शुद्धिसाम्याद्विरोधोऽसिद्ध इति तदसत्। तत्तुगमनत्रिदंडधर्म
योरप्यविरोधप्रसंगात्तदुभयं नैकस्य विहितमिति चेत्तुल्यमेतत्। प्रतिषेधा
त्तत्र न समुच्चय इति चेदिहापि न कर्मणा न प्रजया॥ नानुध्यायान्नबहूञ्छा
ब्दान्वाचो विग्लापनमित्यादिप्रतिषेधस्तुल्यः केवलकर्मविषयो निषेध इ
ति[illegible] न च वाच्यं॥ केवलपदव्यवच्छेद्याभावात् समुच्चयविरोधे रघाविप्रति
श्रितत्वात्तस्मान्न समुच्चये तात्पर्यं मंत्रद्वयस्येत्याह॥ ज्ञानकर्मणोर्विरो
धमिति॥ कर्तृत्वाद्यध्यासाश्रयं॥ कर्मशुद्धत्वाकर्तृत्वादिज्ञानेनोपमर्द्यत
नर इति संबंधयथो सहावस्थानलक्षणं विरोधं न स्मरसि येनैकाधिकारत्वं तयोः
कल्पयसीत्यर्थः॥ मंत्रलिंगादपि तयोर्भिन्नाधिकारत्वं प्रतीयत इत्याह॥

स्त

इहाप्युक्तमिति ॥ जिजीविषोः रागिणः कर्म विहितं सर्वमीश्वर एवेति ज्ञानवतः त्यागो वि-
हितः किंच धनसंपन्नस्यैव कर्मण्यधिकारः प्रथममंत्रार्थाधिकारिणश्च
धनाधनाकांक्षानिषेधेन कर्माधिकारनिषेधः प्रतीयत इत्यर्थः ॥ जिजीविषा हि क-
र्माधिकारिण एव न त्वनाधिकारिण इत्यत्र प्रमाणमाह ॥ न जीवित इति ॥ अरण्यं
स्त्रीजनासंकीर्णमाश्रममियात् गच्छेदिति पदं ग्रा॰ स्त्रस्थितिः ततोऽरण्यवा
सोपलक्षितात्संन्यासान्न पुनरेयात् कर्मश्रद्धया प्रत्यावृत्तिं न कुर्यादिति जिजीवि-
त षादिरहितस्य संन्यासविधानादित्यर्थः । इतश्च नैकफलकामस्य ज्ञानकर्मणोरधि-
कारः प्रतिपत्तव्य इत्याह ॥ उभयोरिति ॥ को मोहः कः शोक एकत्वमनुपश्यत इति स-
निदानानर्थप्रहाणं ज्ञानफलं वक्ष्यति । संसारमंडलांतर्गतमेव च देशांतरप्राप्त्या-
यत्तं हिरण्यगर्भपदप्राप्त्यादिलक्षणं कर्मफलं वक्ष्यति ॥ अग्ने नय सुपथेत्यंते ने-
त्यर्थः ॥ नारायणोपनिषद्वाक्यमपि भिन्नाधिकारित्वे प्रमाणयतीमौ द्वावेवेति ॥
पुरस्तात्सृष्टिकाले अनु निष्क्रांततरौ तत्सृष्टिमनुप्रवृत्तो भिन्नाधिकारत्वा-
द्वावुभयोः संन्यास एवातिरिक्तः श्रेष्ठो भवतीति । परमपुरुषार्थाव्यवधानादि-
त्यर्थः ॥ व्यासवाक्यसंवादमाह ॥ द्वाविमाविति ॥ आद्यमंत्रार्थप्रपंचयितुं प्रथम

॥५॥

मविद्वन्निंदा क्रियत इत्याह ॥ अथेति ॥ तेजोका इति तच्छब्दो यच्छब्दार्थे यथाश्रु
तमिति येनयाहन्त्रा प्रतिषिद्धं विहितं वा देवतादिज्ञानमनुष्ठितं सन्तदनुरूपामेव
योनिं प्राप्नोतीत्यर्थः ॥ आत्महंतृत्वस्यादरभेदिनि प्रसिद्धेः । कथमविद्वांस आ
त्महन इत्याह ॥ कथं त इति ॥ उदरभेदिनो यथा साक्षिकारे प्रसंगाभावादमुख्य
त्वाध्यासेन तिरस्करणमेवात्महंतृत्वमित्याह ॥ अविद्यादोषेणेति ॥ यथा कस्य
चित् मुक्तस्य मिथ्याभिशापोऽन्यास्त्रेव यतउच्यते ॥ तद्वदात्मनि पापिलाध्यासो हिं
सैवेत्यर्थः । अजरामरत्वादिलक्षणोऽहमिति संवेदनमभिधानं च यत्कार्यं त
द्धुत[illegible]नुस्येव न दृश्यत इति हननमुपचर्यत इत्याह ॥ विद्यमानस्येति ॥ अस्या

क त्मघातस्य प्रायश्चित्तविधानादर्शनात्संसरणमेव फलितमित्याह ॥ तेनहीति ॥
उत्तरमंत्रमवतारयति ॥ यस्मात्मन इत्यादिना ॥ अविक्रियमेकं चेदात्मतत्त्वं क
थं केचन स्वर्गगामिनः केचन नरकगामिन इति सांसारिकव्यवस्था मनउपा
धिनिबंधेत्यभिप्रेत्याह ॥ मनस इत्यादिना ॥ उपाधेरनुवर्तनाक्रियादिव्यवहारास्त्र
यत्वमिति शेषः ॥ ननु मनसो देहांतस्थत्वाद्बहिर्गमनाद्योगात्कथं वेगवत्त्वमित्या
शंक्याह ॥ इहदेहस्थस्येति ॥ जवीयस्त्वादिधर्मादिवत्तर्हि चक्षुरादिग्राह्यत्वं प्राप्त

ते

मित्याशंक्याह॥ नैनद्देवा इति॥ चक्षुरादिप्रवृत्तेर्मनोव्यापारपूर्वकत्वा
त्तदविषये चक्षुरादिविषयत्वमप्यात्मनो न संभवतीत्यर्थः॥ मनसो वा कथं
न विषय आत्मेत्यत आह॥ यस्मादिति॥ यथा मनः स्वपरिमाणं मनसो न
विषयो सततात्मव्यवधानात्तथा आत्मा [illegible] प्यसतात्मव्यवधाना मनसो न वि
षयस्तद्व्यापकत्वाच्चेत्यर्थः॥ उत्क्रान्तसंभावनायोपपत्तिमाह॥ तस्मिन्नात्म
तत्त्वे सतीति॥ श्रौतानि कर्माणि सोमाज्यपयः प्रभृतित्रिरद्भिः संपाद्यंत इति
संबंधात् लाक्षणिकोऽप्शब्दः कर्मसु॥ प्राणचेष्टाया व्याप्तिनिमित्तत्वप्रसि
द्धेः कारणवाचकः शब्दः कार्ये लक्षणया प्रयुक्त इत्यर्थः॥ ईश्वरस्यापि हिर
ण्यगर्भस्य नियतत्वस्यान्यथानुपपत्त्या अधिष्ठाता परमेश्वरः संभाव्य
त इत्युक्तमिदानीं मातरिश्वग्रहणमुपलक्षणार्थमादाय तात्पर्यमाह॥ स
र्वाहीति॥ आमिताभ्रलस्य व्यापित्वात् बाह्यतोऽस्ति निरतिशयत्वमत्वाद
तश्चेवास्ति तर्हि निरंतरमेकरसं न स्यान्नानाभावादित्याशंक्याह॥ प्रज्ञा
नघन एवेति॥ उक्तात्मज्ञानस्य फलं विधिनिषेधातीतजीवन्मुक्तः स्वरूपा
वस्थानमित्याह॥ यस्त्विति॥ निरतिशयानंदस्वत एव दुःखासंस्पृष्टमात्मा [illegible]
नतः शोको भवति। हा हतोऽहं न मे पुत्रोऽस्ति न क्षेत्रमिति ततः पुत्रादीन् का

ष वित्तं मे स्यादथ कर्म कुर्वीयेति कामयमानस्य सर्वथैव बाह्यो जायादिर्यदा न
संपद्यते तदाध्यात्मं जायादिसंपत्तिं दर्शयति॥ एतच्चो[…]क्तलिंगं मन आदिष्वात्म
त्वाद्यभिमानस्याज्ञानकार्यत्वाद्यथा च बाह्यकामिन्यलाभे सुप्तो मनो[…]रथ
विजृंभितां कामिनीमुपभुंजानोऽज्ञः प्रसिद्धस्तद्वदयमपीत्यर्थः॥ तेषां च कर्म
णां फलं संसारोपत्तिरेवेत्यपि तत्रैव दर्शितमित्याह॥ तथा चेति॥ एवं साधारण
मन्नं यदिदमद्यते। द्वे देवानाहुतप्रहुते दर्शपूर्णमासौ वा। त्रीणि स्वस्य भोगसाध
नानि मनो वाक्प्राणलक्षणानि। पश्वर्थमेकं तत्पय इति सप्तान्नसर्गो दर्शितः। स्व
स्यायत्तसप्तान्नानि मेध्यया तपसा जनयत्पितेत्यादिना। अत्रैको यजमान एव
विहितप्रतिषिद्धज्ञानकर्मानुष्ठानात्सर्वस्य संसारस्य साक्षात्पारंपर्याभ्यां ज
नकत्वात्पितोच्यते। तेषु च स्वसृष्टेष्वन्नेषु तस्य पितुरहमिदं ममेदमित्यासक्त्याध्या
सेन मन आदिष्वितरेषु च संबद्धाध्यासेनावस्थानं संसारः प्रसिद्ध इत्यर्थः॥ एवं मं
त्रप्रदर्शितेति च्छान्दोग्ये ब्राह्मणसंमतिं दर्शयित्वा प्रकरणविभागं दर्शयति॥ ये तु
ज्ञाननिष्ठा इत्यादिना॥ ओं त्याज्याभिप्र इत्युक्तमात्माभिप्राय इत्यर्थः। साध्यसाधन
भेदोपमर्दनयद्यात्मैकत्वविज्ञानं यस्मिन्सर्वा

उत्तरार्द्धेन

॥७॥ ची

णिभूतानि आत्मैवाभूदित्यवधारणेनोक्तं पूर्वार्द्धेन च संसारनिवृत्तिफल [illegible] १
मुक्तं तल्लप्रीते तस्मात् नैन कर्मणा केनचिदप्यसौ समुच्चिचीषति। अंधतम
इत्यादौ समुच्चिचीर्षया [illegible] विद्यादिनिंदा दृश्यते। ततः किमित्याह॥ तत्र च पश्ये
ति॥ कस्य तर्हि ज्ञानस्य कर्मसमुच्चयः संभवतीत्याह॥ तद्वेवं चित्तमिति॥
यच्चोक्तं भास्करेण ज्ञानस्य इति मंत्रे ब्रह्मविद्यायाः प्रक्रांतत्वात्तस्या एव समु
च्चिचीर्षया निंदोच्यत इति। तदसत्। नहि प्रकृतमित्येतावता संबध्यते। किंतु सं
बंधयोग्यं मुख्यब्रह्मात्मैकत्वविद्यायास्तु कर्तृत्वाद्यध्यासोपमर्दकत्वान्नास्ति
कर्मसंबंधयोग्यता। किंच। यस्मिंल्लिप्यते पि फलस्य व्यवधानं संभाव्यते तस्यै
स्यैव सहकारिसमुच्चयपदृश्यते दर्शादेरिहत्वेकत्वमनुपश्यतः को मोहः कः शो
क इत्येकत्वदर्शनसमकालमेव मोहादिनिवृत्त्यभिधानान्न कालांतरीयं फल
ततो न सहकारिसमुच्चिचीर्षा। किंच ब्रात्मपा विविदिषंति यज्ञेनेत्यादौ तृती
यया ऽक्रत्वाय ज्ञादेरिष्यमाणवेदनेकरणत्वेन संबंधः प्रतीयते। तत्कथं दुर्बले
न प्रकरणेन सहकारितया संबंधः प्रकल्प्यते। प्रधानस्य च विद्यायाः सह
कारिसंबंधयिपित्सया निंदेत्यप्ययुक्तं मतएत

एवंचाग्नीधनाद्यनपेक्षेतिसूत्रविरोधः समसमुच्चयस्य परेणापिनेष्यते वि
रोधेन चापाचक्रे तत्कर्मा विरिक्तदेवताज्ञानस्यैवात्र समुच्चयो विधित्स्यते। न
नु देवताज्ञानस्य कर्मफलात्कर्मफलातिरिक्तफलाभावान्न समुच्चयः संभव
तीत्याशंक्याह॥ विद्येति॥ ननु समुच्चिचीर्षया [illegible] निंदेति किमिति व्याख्याय
ते॥ अध्ययनविधेर्मोक्षादर्वाक्पर्यवसानानुपपत्तेर्देवलोकादिप्राप्तेः फलाभास
त्वात्प्रहरणार्थैव निंदा किं नेष्यते तत्राह॥ तयोर्ज्ञानकर्मणोरिति॥ न फलशब्दो
मोक्षे रूढो मोक्षमनिष्ठतामपि सम्मीलितफलव्यवहारदर्शनात्ततो यो देव[illegible]लो
कादिमुप्रादिसते तस्य तदपि फलं भवत्येवेत्यर्थः॥ चिन्तत्रा मायापरमेश्वरत्वो
पाधिर्मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरमित्यादिश्रुत्यंतरप्रसिद्धाऽत्रो॰
संभूतिशब्देनोच्यते॥ न ब्रह्म॥ तस्य निर्विकारस्य साक्षात्प्रकृतित्वानुपपत्तेः
र्भास्करादिमतस्तु परिणामवादस्तत्वालोके निरस्त एवास्माभिः। सांसारिक
दुःखानुभवाभावेन च सुषुप्तिवत्प्रकृतिलयस्य पुरुषेणार्थ्यमानतानुपपद्य
ते फलं च कर्मपिासनद्वयप्रकृत्युपासनेपि परमेश्वर एव दास्यतीति ततो जडत्वा
त्प्रकृतेः फलदातृत्वानुपपत्तेरुपास्यत्वानुपपत्तिरित्यपि कुचोद्यमेव॥ विस्त
रेणोक्तमर्थजातं संक्षिप्योपसंहरति॥ मानुषदैवविन्नसाध्यमित्यादिना॥ शारी

= ननु तर्हि विद्याविद्ययोर्विरोधोऽस्तित्यविरोधश्रवणात् २०

रूपा प्रवंगोहिरण्यादि साधनसंपत्तिश्च मानुषं वित्तं दैवं वित्तं देवताज्ञानमित्तर गंथस्य संबंधाभिधित्सा तिपार्थविशेषमनुवदति। तत्रेति वेकादीत्यादिना॥ तदिति तं प्रत्यकृत्स्नं मंत्रेण विद्यां चेत्यादिना। अपेक्षितकाम तत्त्वफलमित्यत्र कृत्स्नं मस्मात् इति योजना। आहस्य वपवइति। तस्य त्वरितशिरः स्व इति बाहू स्व इति प्रतिष्ठापादाविसर्पः॥ मंत्रोत्तपदन्नौ व्याख्याय संक्षेपतो विचार्य तेर मारभते॥ अविद्ययामृत्युं तीर्त्वेत्यादिना॥ अमृतत्वं च मुख्यं कस्मान्न गम्यत इति संबंधः। शास्त्रीययोर्ज्ञानकर्मणोर्विरोधाविरोधौ शास्त्रीयावेव ग्राह्यौ न तर्कमात्रेणेति परेणोक्तं सिद्धांती शास्त्रसिद्ध एव विरोध इत्याह॥ नु दूरमेते इति॥ विषूची नानागती विद्याविद्ये दूरं विपरीते अतिशयेन विरुद्धे इत्यर्थः॥ काठके विरोधश्रवणात् अविरोधो भविष्यतीति न वाच्यं॥ विरोधाविरोधयोः सिद्धत्वेन विकल्पासंभवादुदितानुदितहोमयोर्हि पुरुषतंत्रत्वात् युक्तो विकल्प इत्युक्तं॥ तर्हि विरोध एवास्तु समुच्चयविधिबलात् इति चेन्न॥ मुख्यब्रह्म विद्याविद्ययोः शुक्तिविद्याविद्ययोरिव सहसंभवानुपपत्तेः समुच्चयविधिरसिद्धः। सिद्धे समुच्चयविधौ तद्बलादविरोधावगमः॥ अविरोधावगमाच्च समुच्चयसिद्धिरित्यन्योन्याश्रयः स्यादित्यर्थः॥ सह संभवानुपपत्तावपि क्रमेणेत्काश्रये विद्यावि

घेस्यातामितिचेद्यदिपूर्वमविद्यापश्चाद्विद्येतिक्रमस्तर्हिइष्यतएवेयंयदिपश्चा
त्तर्हिसंभवइत्याह ॥ नविद्यो सन्तावितिः ॥ पूर्वसिद्धाया अविद्यायाः प्रध्वंसासा
त् अन्यस्यासत्तौकारणासंभवान्मूलाभावेनक्रमसंज्ञायाग्रहणानामपिविदुषो
नुपपत्तिरित्यर्थः ॥ विद्योत्[illegible]त्तौमात्तुदविद्याकर्मतुभविष्यति ॥ विदुषोपि
व्याख्यानभिक्षाटनादिदर्शनादित्याशंक्याह । विद्यासंभवादिति ॥ चोदनाप्र
युक्तानुष्ठानं हि कर्म ज्ञानेन सहतत्वसमुच्चिचीष[illegible]षितं ब्रह्मलोकं त्वं तु साक्षा
दनुभवतो न चोदना संभवति कामाभावात् कामिनो हि सर्वा चोदना । अकामिनः
क्रिया काचिद्दृश्यते नेह कस्यचित् ॥ यद्यद्धि कुरुते किंचित्तत्तत्कामस्य चेष्टि
तमिति स्मरणात् ॥ विद्वच्छरीर[illegible]स्थितिहेतु विद्याचे शास्त्रपक्षे मन्त्रोषनिमि
त्तं तु विदुषो भिक्षाटनादिकर्म चोदनाभावात् किं तु यावत्प्राणशरीरयोग
भावितत्कर्माभासं तत्र विद्वान्न स्वगतमन्यते । कर्माध्यासोपादानाद्विद्या
संभवात् नैव किंचित्करोमीति प्रत्ययाच्चेति भावः ॥ वदन्त्वमन्तशब्देन मु
ख्यमेवामृतत्वं किं तु गृह्यते विद्याशब्देन परमात्मविद्येति ॥ तत्राह ॥ अमृतमि
ति । मुख्यापरिग्रहे हिरण्मय[illegible]पात्रादिमंत्रेण द्वारमार्गेण वचनमनुपपन्नं
स्यात् । न तस्य प्राणा उत्क्रामंत्यत्र ब्रह्म समश्नुत इत्यादिश्रुतेरतो मुख्या

18

र्थैवाधातु। गौणार्थग्रहणं मुक्तमित्यर्थः॥ यस्मादर्थांतरं न संगच्छते। तस्मा
दिस्कपसंहारः॥ ५१॥ ५॥ ईश्वरप्रभृतिभाष्यस्य टीकाकारस्य परात्मनः॥ मंदोप
कृतिसिद्ध्यर्थं प्रणीतं टिप्पणं स्फुटं॥ १॥ श्रीरामचंद्रगुरुचरणारविंदाभ्यां नमः॥